१७. चतुर्भिर्मुरवै: समीरिता - नायं मिश्र-नाकोक्तो भिन्नरूपसम्मतो विग्रह: । अत: चतुर्दिक्प्रदेशे मुरवं चतुर्मुरवम् । शाक्-पार्थिवादित्वादुत्तरपदलोप: । नतु त्रि-पदतत्पुरुष: । तस्य परिमाणिवचनाभावात् सर्वस्थाऽसम्भवात् । तथा च भट्टोजि:- परिमाणिमात्रेण त्रिपदतत्पुरुष: । अन्यत्र तु द्विपद एवेति स्थितम् । सुप् सुपा' इत्ये-कत्वस्य विवक्षणात् । अत्र वार्तिकम् - उत्तरपदेनपरिमाणिना द्विगो: सिद्धये बहूनां तत्पुरुषवद्योपसंख्यानम् - द्व्यह-द्व्यार इव: स्वकारो द्व्यह:) त्रात:, त्रिमासत्रात: । समाहारे तु चतुर्मुरवीति स्यात् ॥ प्रवृत्ति: प्रवाह: ॥ चतुष्टयी प्रवृत्ति: - परा, पश्यन्ती, मध्यमा वैखरी इति । तस्यामनभिव्यक्तवर्णा ध्वनि-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

मात्ररूपा [illegible] [illegible] [illegible]

अत्र कर्णानिष्टदैन्यस्य पाशोः सम्भवात्
Digitized by Sarayu Trust Foundation and eGangotri
दैन्यमिव दैन्यमिति कल्पनात् असम्भवद्
-वस्तुसम्बन्धो निदर्शनालङ्कारः॥

22. मनः शल्यं मनसः शल्यप्रायम् - अपविद्ध-
ग्रदः - त्यक्तगदः।

23. भूमिं विलिखन् - भुवं कर्षन्-
अलातमुल्मुकं ज्ञेयमिति हलायुधः।

24. चित्रन्यस्ताः - आलेख्यसमर्पिताः।
कृष्णं आलेख्यसमर्पिता इवात्यन्तदृश्यतां
गताः।

25. पर्य्याकुलत्वात् स्खलितगतित्वाद्धेतोः
ओघसंरोधः - प्रवाहप्रतिबन्धः। उत्ताना-
-वरोहात्।

26. शशिनकोट्यः - चन्द्रकलाः। पारिप्लव-
कुरवावतंसेषु जटानां मौलिषु जटाजूटेषु

27. लब्धास्पदतयः, लब्धावकाशा इत्य
-न्यत्र। उत्सर्गाः सामान्यशास्त्राणि-
कृतप्रतिष्ठाभङ्गाः, कृतविषयसङ्कोचरूपा
CC-0. Prof. Satya Vrat Shastri Collection.
बाधा इत्यन्यत्र। अपवादाः विशेषशास्त्राणि।

Digitized by Sarayu Trust. CC-0. Prof. Satya Vrat Shastri Collection.

२९. ... मृदुनानाकुसुमनिचयसम्मूहं तुल्य-
शोभिना नयनानां सहस्रेण।

३०. सहस्रान्नयनेभ्योऽधिकम् - चक्षुभूतः -
द्वा
चक्षुरस्त्वारोपस्य प्रकृतोपयोगित्वात्परिणामा
-लङ्कारः। कर्मं वचो याचस्यतेरयीति याचः।
नलुग्यं समासः। अलुगविधायकादर्थनादीतौ
सत्यम्। तत्पुरुषे कृतीति बहुलग्रहणादलुक्।
तिन दिवस्यौतवास्तोष्यती व्यारकातौ। याच्ञा:
यतीत्यादिना सत्वम्। ये तु तत्र ऋदसीत्यनु
वर्तयन्ति श्रियः पतिरित्यादिसिद्धये तन्मते
पारस्करादित्वात्सुट्। केचित्तु घानाधृक्षिनी
शुनासीरमरुत्वदग्नीषोमवास्तोष्पतीग्रहमेधा
ऋत्व चेति सामान्यापेक्षज्ञापकात् याच्ञा। अलुग्
कस्कादित्वात्सत्वम्॥ इति भट्टोजिः॥

३१. आमृष्टम् आश्लिष्टम् - हे भगवन् मद्-
गृहैश्वर्य्यसम्पन्न! रात्यसीति - वर्तमाने
ऽपि वचनभङ्गा भविष्यन्निर्देशः प्रसिद्धः॥

३२. उदीर्णः उद्गतः। व्यधत्त लोकानां धूमकेतु
-रिवोत्थितः॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

३३. दीर्घिकासु - क्रीडावापीषु -
आगारे नगरे परमित्यमरः ॥

३५. कुसुमानां स्तेमं चौर्यं तस्मात्स्तेयादि-
योगात् दण्डाद्। साध्वसं भयं तस्माद्भेनोः
उद्याते प्रावृत्तगति निवृत्तोद्यानसञ्चारः
सन्नित्यर्थः। तापेसत्वे पि गमकत्वात्समा
-सः। तालस्य वनैरङ्क्ष्यते तालत्येव
वन्तमस्येति वा।

३७. सारितां वृत्तिः - प्रानिव्यक्तेः परियाय
- पर्य्यन्तम्।

४०. शाम्येत् प्रत्यपकारेण। नोपकारेण
दुर्जनः। अपकारोत्तरमपकारेण. अत्र
माधवः - वन्दीति। स्तोतर्य्यानन्त्यकृणा-
न्तः। हठहतमाहलाया नु इन्नीति सर्व-
धातुनिवयेनन्तात् सर्वतो ऽस्त्रिच्चार्षादेत्ये
के इति ङीषि सिद्धमिति ॥ सुरवन्दीनां
सुरग्रहस्त्रीणाम् - सुराश्च वन्द्य इति
सुरवन्द्यः - पुंवत्कर्मधारयजातीयदेशीयेषु
इति पुंवत्। बालानां नेत्रवारीणां शीक
-रान् बिन्दून् वर्षितुं प्रेमा। शीलम् इति तेषाम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

४३. आक्रीडिन्ते एव्विति आक्रीडाः, आक्रीडाश्च ते पर्वताश्च - पुमानाक्रीड उद्यानमित्यमरः।

४५. विमानानां पथि दिनलीभूते सति। व्योमयानानां मार्गे ऽवहतीभूते।

४६. नः मिषतां अस्मान् पश्यतामेवि। आच्छिद् नसि -द्यते आच्छिद्य गृह्यते॥

४८. प्रतिहतक्रियाः विफलप्रयोगाः। सारवन्ति मेघवन्ति। यस्मिन् हरिचक्रे नो विजयाशंका अस्तीतिति

५१. निष्कम्पशोभूषणम्। तटाघातं नदक्रीडाम् अनस्य शान्तये निवृत्तये - कर्म्मैव बन्धः तं छिन्दन्तीति नन्दी - धर्म्ममात्मज्ञानदनुभूतम् - ज्ञानाग्निः सर्वकर्म्माणि भस्मसात्कुरुते ऽर्जुनः, इति तात्त्विकज्ञानस्य कर्म्ममात्रनाश - -फलश्रुतेः॥

५२. सुरसैन्यानां गोप्तारं मं सेनान्यं प्रयोधाम -

५४. सर्ग एव व्यापारः - सम्पत्स्यते सेत्स्य -ति। गर्जिताद् गर्जितस्य वा अनन्तरं प्रवृत्ताम्

५५. विकटरोषे सत्रैधर्म्मस्य क्षयं दर्शयितुमसाम्प्रतम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

तिऽकृत्तद्धितसमासैः वारसंख्या नमित्यस्य
प्रायिकत्वात्कृत्यनियतेनाप्यभिधानम्-
भाष्ये ओम् प्रणव इत्याचक्षते इति प्रयोगो
पि प्रकृते प्रमाणम् ॥

५७. अन्वयः- संयुगे उद्यतं सांयुगीनं तं
निर्विकल्प्य नीललोहितरक्तसो ऽंशादृते
(अन्यः) कः प्रलहेत ॥ व्याप्रेमाणम्-
सांयुगीनः प्रतित्रनादिभ्यः खानीतिरक्तः
नीलः कण्ठे लोहितश्च वेशो विद्यते स्वामी.
रक्तस्य। वर्णो वर्णेनेति कर्मधारयः॥

५६. परि
प्रश्निच्छप्रभावार्द्धिः- अवागढमहिमाति-
शयः। अन्वयः। ते यूयं संयमास्तिमितं
शम्भोर्मन उमारूपेण अयस्कान्तेन लौह-
वत् आकृष्टुं यतध्वम्॥ समाधिनिश्च
-लं मनः। आकृष्टुम्-

६०- इन्द्वर्थे वा नतु अन्वर्थे।

६३. कार्यसंसिद्धौ विषये या त्वरा औत्सुक्यं
तया। त्रिगुणं दृढं वेगो यत्य तेन।

६४. अन्वयः- अथ स पुष्पधन्वा ललित-

CC-0. Prof. Satya Vrat Shastri Collection.

अयस्कान्तेन मणीनिवोर्वेण
लोहस्य अयोधातुमिव।
तेन तुल्यं क्रिया चेद्वातेरेतं नीतपत्यधो मुखः॥

Digitized by Sarayu Trust Foundation and eGangotri

योविद्रुलताचारुहस्तं नाम्नं दत्तवलय यदाऽऽह
कण्ठे आसज्येत्यादि। रतेः स्मरप्रिया तस्याः
वलयपदानि कङ्कणस्थानानि अङ्कोऽस्येह
घस्य स तथोक्तः।

सम्पूर्णा द्वितीयाङ्कटिप्पण्यः॥

अथ तृतीयसर्गटिप्पण्यः -

१. अन्वयः- मधोनोऽक्ष्णां सहस्रं निदधान्
निहाय तस्मिन् युगपत् पपात। प्रायः
प्रभूणामाश्रितेषु गौरवं प्रयोजनापेक्षितया
प्रयोजनापेक्षितया कार्यार्थित्वेन। प्रायो
भूम्ना। गौरवम्- आदरः। परतन्त्राः
प्रभवो न गुणतन्त्रा इति भावः॥

२. अन्वयः- स नासवेनासनसोन्मुखीमितो
निमीदीते विसृष्टभूमिःसन्। भर्तुः प्रसादं मूर्ध्ना
प्रतीतन्य मिव एनमेवं वक्तुं घात्रमत॥
दत्तावकाशः, प्रतीतन्य- तस्माद- मिथोऽ
न्योन्यं दृष्टिविनिमयस्य।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

३. हे [illegible] आज्ञायय तादीत्ति शेवः लोकेषु ते मत्करणीयमस्ति। सस्मरणप्रवृत्तमनुग्रहं आज्ञया संवर्धित-मिच्छामि। इत्यन्वयः। शीतलार, शीतयुं-निशेमेत्यर्थः। सापेक्षत्वे पि गमकत्वात्समास उत्तरवाक्ये मच्छब्दप्रयोगान्न पूर्ववाक्ये तच्छब्दप्रयोगनिर्बन्धः। आज्ञया नियोगेन।

४. अन्वयः- पदकाङ्क्षिणा केन नितान्त-दीर्घैस्तपोभिरभ्यलूया नीनेता। यावत् (स) आहितसायकस्यास्य मत्कार्मुकस्य निदेशावर्ती भवति॥ अभ्यलूया - ईर्ष्या द्वेषो वा। निदेशावर्ती - आज्ञावशः आहितसायकस्य = संहितबाणस्य। भवतीति वर्तमानसामीप्ये भविष्यन्नि-देशः॥

५. अन्वयः - तव असम्मतः कः पुनर्भव-द्वेशभयान्मुक्तिमार्गं प्रयत्नः। त आरेचित भूचतुरैः भुवनानां कटाक्षैः (न्चिरं) वशीचरं तिष्ठतु।

CC-0. Mumukshu Bhawan Varanasi Collection.

Digitized by Sarayu Trust. Foundation and eGangotri

आरोचितानि: [illegible] पैर्धीतिताभि: ।
ईषद्भकीकृताभि: । चतुरै: मनोरमै: । निर्वाण
-पक्षम् ॥

६. अन्वय: - उद्यानतो नीतिमध्यायि-
तस्यापि ते द्विष: कल्यार्धधर्मो पुनरुद्ओच:
सिन्धोस्तटावेव वीडयामि वद ॥ शत्रेण.
प्रयुक्त: रागो विषयाभिलाव एव चरो येन.
सिन्धो:- नद्या: । वीडयति वातयतीति नया:
पक्षे ॥

७. एकपत्नीव्रतदु:खशीलाम् - कां नितम्बि-
नीम् - व्रतं पातिव्रत्यम् स्वयं गृह्णातीति
स्वयंग्राहा - विभाषा ग्रह इति णप्रत्यय: ।
गृह्णातीति व्युत्पत्तिमात्रपुरस्कारेण कानेना
-यं प्रयुक्त: । निरङ्कुशा: कवय: इतिवत्कीत्
अन्ये च गौरजनात्कर्मणो घञ् इत्याहु: ॥

८. सुरतापराधात् - अन्यासङ्गात् - पादा-
नत: प्रणत: ।

९. विप्रलब्धहतपुत्रधात्री: । उदास्ताम् ।

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Sarayu Trust Foundation and eGangotri

१०. अन्वयः- तत्र प्रतीयमानम्

अन्ये धनिनो मम के। न केवलमत्यर्थः।
हरः पिनाकी चेत्यतिदारुणः। किं शब्दः
कुत्सायाम्- कुत्साप्रश्नवितर्केषु किं किराऽ
इष्यते इति शाश्वतः॥

११. अन्वयः- आरवण्डल उत्तेदशाद् पादं
आक्रान्त्या। आक्रमणेन सम्भावितं पाद-
पीठं यस्मिन् तथा तथा। तत्रीस्तेऽर्थे
मनोऽभिलषितेऽर्थे इत्यादि॥

१२. अन्वयः- हे सरवे! सर्वमेतत् त्वयि
उपपन्नम्। मम कुलिशं भवांश्च उभे
अस्त्रे - इत्यादि- कुण्ठं प्रतिबद्धप्रसरम्।

१३. हे सरवे ते तव सारं बलमवैमि वेद्मि -
अतः खलु - अत एव। कृशेन भूधरताम्
अनेन त्वेव इत्यादि- उद्धरणाय - क्रियार्थो
- पपदस्यानि न इति चतुर्थी॥

१४. प्रतिपन्नमल्पं - अङ्गीकृतप्रायम्।
ईप्सितमेतदेव निबोध - हृदयस्थं बुध्यस्व।
शंस स्तुतानित्यस्य ग्रहणम्। आङः शासि इच्छा-
मिते तु आत्मनेपदी आशास्येषु स्वतन्त्रः पठ्यते॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

१५. अन्वयः- हि अमी देवा: तस्याम् भवत्यं वीर्यप्रभवं सेनान्यमशंसन्ति। ब्रह्माऽभूरित्यादि ब्रह्मणां सद्योजातादिमन्त्राणाम्- अङ्गानां हृदयादिमन्त्राणाम् भूः स्थानम्। नश्चो भाषायां प्रयोगो वार्तिककारमतेन साधुरिति कैयटः॥

१६. अन्वयः- यतात्मने तस्मै हिमाद्रेः प्रयतो तनूजामित्यादि। यत अनाकुल आत्मा बुद्धिर्यस्य, नियतचित्तस्य। योक्तृ- यतश्च निर्धारणे इति सप्तमी। नेतुं पीतेदायिनीं कर्तुम्॥

१७. अन्वयः- नगेन्द्रकन्या च गुरो र्नियोगा -त् अधित्यकायां तपस्यन्तं स्थाणुमन्वास्त इति .... स वर्गः सप्तर्षीणामधिः- सोऽस्मद्गो- गणा: सप्तर्षीणामधिः मम गुरुश्चर:॥

१८. अन्वयः- तद् सिद्धौ गच्छ... अयमर्थो ऽर्थान्तरमाक्षिपन् बीजाङ्कुरः उदयात् प्राक् अम्ब इव त्वामुत्तमं प्रत्ययमपेक्षते॥

अर्थान्तरमाक्षिपन्- साध्यः। प्रत्ययोऽधीन -शायश्च स्थानेऽधमालहेतुषु — अत्र कारणे ऽर्थे प्रयुक्तः। अन्तरलक्षणेऽपि यथा

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अलं विग्रहे [illegible] पार्वती सादिन-
-ध्वमपि त्वां विना नैतत्लभ्यादेवेत्यनीति
भावः ॥

१९. अत्यगाति स्तवैव नामेति मैत्रेयीयम्-
अन्यसाधारणं न भवतीति स्वभिन्नकरणा
-योग्यम् । अप्यप्रसिद्धे यशसेहि पुंसामनन्य
साधारणमेव कर्म्म ॥

२०. अहो बत इति सम्बोधने - अहोवतानुकम्पा-
-यां खेदे सम्बोधने विस्मये - इति विश्वः ।
आश्चर्य्यं विक्रमो सि । आश्चर्य्यं स्पृहणीय-
-श्चेति नानार्थकोशः ॥

२१. अन्वयः - हे मलय ! असौ मधुश्च ते
साहचर्य्यादनुक्तोपि सहाय एव । समीरणो
हुताशनस्येति नोदर्थिता भवेति केन या-
दिश्यते । अत्र मधुसमीरणयोरुक्तिमन्तरेण
सहायताकरणं सामान्यधर्म्मः । तत्र नान्य
-ज्ञेय वस्तु प्रतिवस्तुभावेन पृथग् निर्दिष्ट इति
प्रतिवस्तूपालङ्कारोयम् ॥

२२. शेषामिव - प्रसादत्तां मालामिव -
प्रसादान्निर्जनिर्मास्मदाने शेषेति कीर्तिता
इति विश्वः ॥ प्रोत्साहनार्थेन ताडनेन ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

शेवामिवाज्ञामित्यत्र साधकबाधकप्रमाणाभावात्
उभयोत्प्रेक्षयोः सन्देहसङ्करः। यदि सर्वो शेवायि
दत्ता तदा तामाज्ञामिवेत्युपमा। अथ न दत्ता तर्हि
शेवात्वेनोत्प्रेक्षिता। शेवादानन्तु सन्दिग्धमिति॥
आस्फालनमुद्धर्वणार्थम्॥ to cheer up.

२३. अन्वयः स अभिमतेन सरक्षा साधनेन ---
साशङ्कम्- संकटमापतिततमे सम्भ्रमम्-
शीर्त्वा मृत्वा सर्वथा देवकार्यं साधयिष्या-
मीति कृतनिश्चय सन्नित्यर्थः॥

२४. अन्वयः- तस्मिन् वने संयमिनां मुनीनां
तपःसमाधेः प्रतिकूलवर्ती मधुः सङ्कल्पयोनेः
अभिमानभूतमात्मानमाधाय जजृम्भे॥ समाधि
-मतां वाचंयमानाम्। तपोलक्षणः समाधिः
चित्तैकाग्र्यम्- सङ्कल्पयोनेः- मनोभवस्य-
कुसुमपल्लवकोकिलकूजितादिलिङ्गवातुल्येन
प्रादुर्भूत॥ आत्मानम्- स्वरूपं स्वभावम्॥

२५. अन्वयः- उषारश्मौ तमसं विलङ्घ्य
कुबेरादेशं गन्तुं प्रवर्तते (लाते) स दोलेणा दैर्
इत्यादि। तमसं- दोलेणायनकालं सक्रम-
कालश्च- अन्धाण्डे मोतक्रम्य॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

ग्रन्थं चलितुं समर्थान्तरम्। उष्णारश्मौ सूर्ये लाहलिनि च नायके। स्वभर्तरि लक्ष्मयो-
-ल्लङ्घनेन परानुरागसक्तीति प्रवृत्तेलीति स्त्रियो
दाक्षिण्यादनुक्तिश्चेदा दुःखान्निश्वसन्तीति
भावः। मुखेनाग्रभागेण वक्त्रेण वायुं
प्रेरयामास। उत्तरायणेलीति मलयानिलाः
प्रवृत्ता इति भावः॥ अत्रोदीच्यां वरपरिग्रह-
भूतप्रतिनायिकात्वम्, उष्णारश्मौ नायकत्व-
-मारोप्यते, गमने नायकव्यापारविशेष:,
एवमन्यत्रापूह्यम्। अतः समासोक्तिरलङ्कार
इत्यठणागिरिनाथः। मल्लिनाथस्तु -
केवलविशेषणसामर्थ्यादेवाप्रस्तुतप्रतीतौ
समासोक्तिरलङ्कार इच्छते। अत्र तु विशेष्यसाम-
-र्थ्यादपि नायिका प्रतीयते। तस्माच्छब्दश-
-क्तिमूलोयं ध्वनिः॥ गन्धवहः- वहतीति
वहः- पचाद्यच्। ततः कर्मणः शेषत्वविवक्षया
षष्ठीसमासः। अन्यथा कर्मण्यणीति गन्ध-
-वाह इति स्यात्। तथा च -
साध्वस्य मङ्गलनमम्बुजलोचनायाः वक्षोजयोः
कनककुम्भविलासभाजोः। आलिङ्गतीति प्रसभ-
CC-0. Prof. Satya Vrat Shastri Collection.
मक्षामदोषमलमादधन्यत्तमेव मलयाच्चलगन्ध-
-वाहः॥

Digitized by Sarayu Trust Foundation and eGangotri

श्लो २६. अन्वयः — अहो लयः त्वदन्धात् प्रभृत्येव तथल्लवीन कुसुमानि अलूत। प्रकाण्डात्- भाष्यकार वचनात्प्रभृतियोगे पञ्चमीति कैयटः। भाष्यञ्च मूलात्प्रभृत्यग्रात् वृक्षांस्तक्षणुवोत्तरतीति कार्तिक्याः प्रभाति अग्रहायणी माल इत्यादि। अजीजनत्- आशीर्लिङि तो नूपुरो यस्य तेन- शीङ्जिधातो - रुत्कर्मकात्कर्तरीक्तः ॥ पादाहतः प्रमदया विकलत्यशोकः शोकं महातिबकुलो मुख शीधुसिक्तः। आलोकितः कुरबकः कुरुते विकाशमालीडितासितलक उत्पलिन्दो वि - भाति ॥

पद्यः

२७. अन्वयः — प्रवालोडुम्बराहृत्यचे नवकृत - वाणे समाप्तिं नीते सति लय इत्यादि। पल्लवाङ्कुरा एव आरुणा पत्राणीव पक्षा यस्य तस्मिन्- अत्र प्रवालपत्रेत्यायेन - देशविवर्त्तिरूपकं मधोरेवुकारत्वं रथयत् नामाक्षराणीवेत्युत्प्रेक्षायां निमित्तमात्येन देशविवर्त्तिरूपकोत्थापितोत्प्रेक्षा ॥

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Sarayu Trust Foundation and eGangotri

२८. अन्वयः- [illegible] वर्णप्रकर्षे लीलानिर्गन्धतया चेतो दुनोति स्म। प्रायेण विश्वसृजः प्रवृत्तेः गुणानां सामग्र्यविधौ पराङ्मुखत्वी ॥ सांकल्यसम्पादनविषये। सर्वत्रापि वस्तुनि क्वाप्यचिद् वैकल्यं तस्या-दयाते यथा चन्द्रे कलङ्कः।

२९. अन्वयः- अविकाशभावाद् बालेन्दु वक्त्राणि। आतैलोहितानि पलाशानि बलतेन समागतानां वनस्थलीनां सद्यो नवक्षतानीव बभुः ॥ सद्यो पलाशानि-पुराणीक्वातितलौहित्याभावादिति भावः ॥ पलाशो किंशुकः वर्ण इत्यमरः ॥

३०. अन्वयः सुस्पष्ट एव लग्नद्वितीया एवाञ्जनभक्तयः रुजलरचना लतामिश्चित्रे चित्रवर्णे। तैलकं पुष्पावनद्धोवमेव तैलकं वैशेषिकम्। रागेण- रक्तेन। तेनैव लाक्षारागेण- रक्तवर्णेन लाक्षारागेण च रागो लाक्षारसे पि चैति मेदिनी:। भक्तिर्नि-वेशो भागे रचनायामिति शब्दार्णवः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

३१. अन्वयः- क्रियालुभिः किन्नरीणां रजःक्लौ-
विर्द्धौतदृष्टिपाता मदोद्धता मृगाः पत्र्यनिलं
मर्मरपत्रमोक्षा वनस्थली निर्विचेरुः॥ दृष्टीनां
पाताः भ्रमाः येषान्ते। मर्मरशब्दवन्तो जीर्ण
पर्णपाता यासु। मर्मरः शुष्कपर्णानामिति
यादवः। अयञ्च शुल्लादिशब्दवद् गुणीनि
वर्तते॥

३३- अन्वयः - हिमकषायाद् विशदाधराणा-
मापाण्डुरीभूतमुखच्छवीनामित्यादि-
विशदा नीलजाः। अफालस्तत्कषायगमात्
निर्मलोऽधरो यासाम्- हिमस्य तुषारस्य-
स्वेदोऽम्भः- उद्भूतस्वेदः, घर्मः। स्वेदाविन्दवः
किन्नरीणां पत्रभङ्गातिलकेषु विच्छिदुर
तामजनमन् इत्यर्थः॥

३२. अन्वयः- चूताङ्कुरास्वादकषाय-
कण्ठः पुंस्कोकिलो मधुरं चुकूज यत्
तदेव --- कषायकण्ठो रक्तकण्ठः-
रक्तत्वं च सुस्वरता। पुंग्रहणं प्रागल्भ्ययोन
-नार्थम्- अनेन कोकिलालापस्योद्दीपनत्वं
प्रतीयादितम्॥ त्यजत मानमलं वत विग्रहैः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

न पुनरेति यातं वयः। परमतामिरितीव
निनेदिते स्मरमते रमते स्म वधूजनः,
इति च रघौ ॥

२४. अन्वयः- स्थाणुनौकलत्वात्त्वेन आ-
-कालिकीं तां मधुप्रवृत्तिं वीक्षेत्यादि।
समकाल आद्यन्तावत्या:, अकाल-
भवत्वादुत्पत्त्यनन्तरविनाशीत्यर्थः
आकालिकडाद्यन्तवचन इति समानका-
लादिकट्प्रत्ययः प्रकृतेराकालादेशश्च
निपातितः ॥ नित्यद्वैकारणाम् ॥

२५. अन्वयः- आरोपितपुष्पचापे रतीद्वितीये
मदने तं देशं पवने सौते द्रुमाणि कुसुमागत-
स्नेहरसानुविद्धं क्रियया विभ्रु: ॥
आधिज्यकौसमकार्मुके- स्फोटसारी।
अङ्गमाने च मिथुनाने। अनुविद्धं सम्पृ-
क्तम्। भावं शृङ्गारभावम्- क्रियया
कार्यभूतया चेष्टया-

२६. ईदृक्: त्वां प्रियामनुवर्तमानः लब्-
ऊसुमैरुपात्ते मधुवयौ। शेषं स्पष्टम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

स्पर्शसुखेन- अकम्पडुयत् कम्पितवान्।

Digitized by Sarayu Trust Foundation and eGangotri

३७. अन्वयः- ततः करेणुः पद्मेन पद्मगन्धि जलं गजाय ददौ॥ पद्मेन करेणुः तस्यो गन्धोऽस्त्येव। पुरा नार्पितं जलम्। सन्तोषयामास॥

३८. अन्वयः- किमुस्वः श्रमवारिलेशैः किञ्चिदुद्भासिततनुलेखं पृथ्वासनाघूर्णितनेत्रशोभि प्रियामुखं गीतमध्ये चुचुम्ब॥

स्वेदोदबिन्दुभिः। किञ्चिद् निश्लोषितं विशेषणं यस्य तत्। पृथ्वीजनमयेनोक्ता-ष्यां नयनाभ्यां शोभत इति तथोक्तं प्रियामुखं चुचुम्ब। चुबि वक्त्रसंयोगे परस्मैपदी. अन्योदित्त्वाद्घातनत्वेन चारितार्थ्यात्कर्तृस्थं शापनत्वम्। नाभ्यानुक्तस्य शापनत्वम्- अतः स्वार्थेणित्यायमाद्येवेति नागेशः॥

अत्र केचिन् 'चुचुम्बे' इति पठन्ति कर्मकीर्तेहेतौ च तमर्थयन्ते- तन्न। तत्र (कर्मकीर्तेहेतौ) वर्तमानाद्धातोः कर्तरीत्यर्थे वीनेगमनादेर-हात् तत्कर्तृमात्रे प्रत्ययौचित्येन द्विवचन-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

बहुवचनान्तेनोदाहरणानि। नत्वेकवचना
-नानि। अत एव सूत्रेऽत्र एकवचनान्तानि
नोदाहृतानि। तासत्यो रीति सूत्रवदुदाहृतं
सीतेले इति तु छान्दसम् इति शब्देन्दु शे-
खरे नागेशभट्टः॥

२६. अन्वयः- पर्य्याप्तपुष्पीते---

पर्य्याप्ताः समग्राः पुष्पस्तवका एवस्तना
यासां तस्याः सकाशात्। स्फुरन्तः प्रवालाः
शोभमाना एव ओष्ठा यासान्ताः।

४०. अन्वयः- तस्मिन् क्षणे हरः श्रुताप्सरो
-गीतिरपि प्रत्यक्षानपरो बभूव। आत्मेश्वरा
-णां विघ्नाजातु समाधिभेदभ्रमो न भवेत्॥
प्रत्यक्षाने आत्मानुसन्धाने परः। ईश्वराणां
नियन्तृणां योगिनामित्यर्थः। ध्याने त्रये
प्रत्यक्षानं नित्यानित्यविचारणे। इति
शाश्वतः॥

४१. अन्वयः- चापलाय मा(अवत) इति
व्यनैषीत्। "संज्ञा स्यात्चेतना नाम
हस्ताद्यैरर्थसूचना" इत्यमरः। इङ्गित्या
अङ्गुल्याः संकेतेन सूचनया। हेमवेत्रः हेम-
दण्डः॥ [illegible] दिग्गजोऽयमदत्येति-मनुशी-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust. Funding by MoE-IKS

४२. ~~दीक्षा सातत्यं दीक्षातत्परैरेवं~~ --- सर्वमेव दानं तच्छास्त्रात् चिकीर्षितारम्भमिव अवलम्ब्य ॥ निश्चलमङ्गं - आलेख्यविन्यस्त क्रियम् ॥

४३. अन्वयः- कामः प्रयाणे परः शुक्रमिव तस्य दृष्टिप्रयाते पौरोहित्य प्रान्तेषु ललाट-नमिलशारवं भूतपते ध्यानास्पदं निवेश ॥ प्रदोषतः शुक्रो यस्मिन् देशे तमिव। प्रयाणे यात्रायाम्। संसक्ता अन्योन्यसंश्लिष्टाः। समाधिस्थानम् ॥ दृष्टिप्रयातः- दृष्टिविषयः। तरं तूलं तरं कक्षः प्रयातो। रोध उच्यते इति हलायुधः ॥

४४. अन्वयः सुस्पष्टः। निकटभावी गात्रभ्रंशो यस्य स। साध्वसेन आस्तृताम्। देवदारुद्रुमोत्सङ्गविशेषलक्ष्य वेदिकायां तन्मूलस्थापिण्डिकायाम् ॥ अत्र भाष्यम्- इषुकादिप्रकरणे तन्त्रादीनां कक्षासि बहुलम्" इति वार्तिकव्याख्याने तन्त्रं प्रवेम। तन्त्रं प्रवेम। विष्वं पश्य। विष्वं पश्य। स्वर्गं लोकम् स्वर्गं लोकम्। अग्नये स्वाहा। सोमाय स्वाहा

CC-0. Prof. Satya Vrat Shastri Collection.

इत्यामुराहरति ॥

Digitized by Sarayu Trust Foundation and eGangotri

४५. अन्वयः- वर्ष्मऽभ्रुवन्धोति ---- उत्तानपाणिद्वयसंनिवेशात् अभ्रूमध्ये प्रकुल्लराजीवनमिव (स्थितम्) । वीक्षणेन । निश्चलोत्तराङ्गम्- उत्तान ऊर्ध्वतलो यः पाणिद्वयस्य सन्निवेशः संस्थानम् ॥ वैजयन्तीकारः - प्रोक्ता नहीतिका तका । वर्ष्मोत्तिका परिकरः वर्ष्मऽभ्रुवोति व्यक्तते इति हलायुधः ॥

४६. अन्वयः- सम्यक् स्फुटः । भुजक्रमेन उन्नमय्य नद्धो त्रयात्मूहो येन- कलापो भूषणे वर्हे तूणीरे संहते ऽथे चेत्यमरः । कृष्णत्वन् अनेन ग्रन्थियोगेन वहिस्ता आसीत् ॥ अक्षसूत्रम्- जपमाला ॥

४७. स्निग्धोत्पक्ष्मा ईषत्पक्ष्माणः स्निग्धपक्ष्माणः स्निग्धाश्च ते पक्ष्माणः कनीनिकाः येषां ते- भ्रूविक्षेपे- नासाग्रनिवेशदृष्टिम्-

४८. अन्तश्चराणां मरुतां निरोधात्- आविद्यमानमर्वाक्स्रोतम्- अनुद्भतवीचि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

को हृद्य हुआ। निर्वाणदेशे -

४८. धीरोल्किनमनाध्वेदेण ग्रामवधै :
धीरलः समागतैः तेजः कणैः विलतन्-
समधिवक्कोमलां नवशाधोल्कलां ज्ञापयनम्

५०. अन्वयः- स्मरत्तपामृते मनसाप्यधृष्य
-मयुग्मनेत्रामित्यादि। विधमास्त्रम्।
मनसाप्यनाक्रमणीयम्। विश्लक्षपातिः।

५२. अन्वयः- अक्ष निर्वाणभूयेष्ठंमत्यवीर्य्यं
वकुर्वाणेन संधुक्षयन्तीन वनदेवतास्यो
मनुप्रयाता स्थानरराज कन्यादृश्यत॥

निर्वाणेन नाशेन भूयेष्ठं नष्टप्रायम्
संधुक्षयन्ती - पुनरुज्जीवयन्ती.

५४. आवर्जिता ईषदानमितवपुः। पल्लवेनो
किलालमवनती - घर्मार्ताः पुष्पस्तनकाः
कुसमगुच्छाः। लता वल्लीन-

५५. अन्वयः - स्थानादिदा स्मरेण .....
नितम्बात् स्खलतां केशरदामकाञ्ची पुनः
पुनरवलम्बमाना- धारयन्ती- निसेवमो
-ग्य मह्यमिवेदमना गमेन।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

५६. अन्वयः- सुगन्धिनिश्वासावि-
वर्द्धितश्रमेत्यादि। प्रतिक्षणं
स त्वरया चपला दृष्टिर्यस्या सा।
बिम्बाकारोधरः बिम्बाधरः।
बिम्बाधर इतिवत्तौ मध्यपदलोपिन्या-
मिति वामनः। अन्यका अधरबिम्ब
इतित्यात्। लीलया अरविन्देन।
अश्वधात्रादिवत् तात्कर्म्यार्थे षष्ठी-
समासः। न तु मनुष्यीत्यपत्यः। प्रकृति-
विकृतेरभावात्॥

५७. अन्वयः- सर्वावयवानवद्यामित्या
दि- पुराशङ्कांसे भूयोपि चक्रमे - सर्वाव
यवेषु अगर्ह्यामू- लज्जानिमित्तं न्यूनता
-मावहन्ती॥

५८. अन्वयः — उमा च भविष्यतः
पत्युः शम्भोः प्रतीहारभूमिं तमात-
साद। स च अन्तः परमात्मसंज्ञं
परं ज्योतिः इच्छा योगाद् उदारराम॥

५९. ततः चोलप्य (नालुके:) (अधः)
न कणाग्रः अधः भूमेरधः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

आतिथ्यत्वेन धृतः स्वीयवेशनमूभागतेभ्यः
प्राणोऽनिले वले। हड्डायो पूरिते गन्धरले
प्राणास्तु जीवते इति हेमचन्द्रः॥ अतोयं
नित्यबहुवचनान्तः पुंल्लिङ्गश्च।

६०. तस्मै भगवत इति क्रियाग्रहणाच्चतुर्थी।

६१. प्रीतीयातपूर्वं मन्दीर्यीते त्यन्वयः।
स्वहस्तोपचितः। शिशिरात्मजस्य नलस्य
सम्बन्धी। पल्लवनञ्जलिमिश्रः = किसलय
रूपकलामिश्रः। पुष्पोच्चयः - हस्तादाने
वैरल्येण इति धात्विषयत्वात्कर्मीनामयं
प्रामादिकः प्रयोग इति वल्लभः। भिन्नोन्यः।
सञ्जातः कुल्लो वर्ण इति हेमचन्द्रः॥

६२. मूर्ध्ना नमश्चक्रजाय प्रणामं चकार।
क्रियाग्रहणात्सम्प्रदानत्वम्।

६३. अन्वयः- ता भवेन अन्यभजं पतिमा-
-मुद्वहे इति तथ्यमेनामभिहिता। हे ईश्वर-
आहृतयः कदाचित् लोके विपरीतमर्थं
न प्रकाशन्ति। अन्यां न भजतीत्यनन्यभज-
-म्। सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः।
विलंबायै नमोऽधीयम्॥ बोधयन्ति॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

६४. अमन्दभावः — मदनोऽपि वाणावेधसमयं प्रतीक्ष्य शैलसुतो जिनमध्यं विवासुः गौर्म्याः सन्निधाने पद्मोद्भवे कृतलक्षः सन् चापज्यामत्यन्तमाचकर्ष ॥

६५. अथ त्रौरी तपोवनेन गिरिशाय ताम्रचूडेन कुरुते — बालामुपनिन्ये इति योजना कर्मणा यमभिप्रैति स सम्प्रदानमिति चतुर्थी यद्यप्यत्र ददातिकर्मणा इति वर्तिकाशब्दैः भरिक्तं तथा तत् अर्घ्यकरम् । अतएव तस्मै ददाति अर्घ्यपाणि उपनयति इत्यादि ॥

६६. अन्वयः — त्रिलोचनश्च पत्नीप्रियत्वात् तां प्रतिग्रहीतुमुपचक्रमे । पुष्पधन्वा च सम्मोहनं नाम अमोघं वाणं धनुषि समधत्त ॥ अर्धाङ्गप्रियत्वात् । पत्न्यधिनः प्रिया यस्य तस्य भावः तत्ता तया हेतुना ।

६७. हरस्तु चन्द्रोदयारम्भे ऽम्बुराशेरिव त्रैलोक्यक्षोभलुप्तधैर्यः इत्यादि चन्द्रोदयारम्भे — सुधाकरोऽस्तकाले नयनानि निपातयामास ॥

६८. [illegible] सन्दोमलनीयसदृशैः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

पुलकितैरिति सर्वत्र। दीर्घमिति वर्णे साचि तिर इत्यमरः।
साची कृता - क्वौ चेति दीर्घः। अव्ययस्य
दीर्घत्वं नेति पक्षे साचीति दीर्घान्त एव
पाठः। वस्तुतस्तु "अव्ययस्य दीर्घत्वं नेति कै-
यटेन। तन्निर्मूलम्। स्वस्ति स्यादीति तु महा-
भाष्यया चेरभावात्तिद्धम्। स्वस्तीत्यादि
त्याये पक्षे स्यादीति चेदस्तु॥" भट्टोजिः॥

७०- दक्षिणनेत्रप्रान्तसंलग्नमुष्टिम्। मण्डली-
कृतलौम्यकोदण्डम्। अवनतबाहुमूलम्।

७१. ३ तयत आस्कन्दनेन प्रवृद्धकोपस्य
"अतार्कितेतु सहसा" दुष्प्रेक्षं दुर्दर्शम्॥

७२. अन्वयः- हे, प्रभो क्रोधं संहरसंहर
इति मरुतां गिरः रथे यावच्चरन्ति तावत्
भवतेऽजन्मा स वाहैरित्यादि॥ विनतेय-
चापले द्वे भवत इति वक्तव्यमितीङ्गितानि॥

७३. वध्वीयनाचीमरन्ध्रः- अतिदुःसहान्
विभवसम्भवेन करणानां आपारं यौत
नश्रता मोहेन रतेः रणपरान्तभर्तृचेष्टा सम्यक्
उपकृतेनासीत्। मोहेन दुरनुसंवेदनाभा-
वात्तस्योपकारकत्वोक्तिः॥

CC-0. Prof. Satya Vrat Shastri Collection.

अभिमुखः स्वीभवने सङ्के आक्रोशने पिच-
इति वैत्रयन्ती ।

Digitized by Sarayu Trust Foundation and eGangotri

७४. अन्वयः — तपस्वी भूतपतिस्तपसो
विघ्नं तमाशु वह्नी वनस्थोतामिवावगम्य
इत्यादि । अन्तरायभूतम् । तपोनिधः ।
आज्ञानि दीक्षामिव नक्षे ॥

७५. शैलात्मजा निर्वर्तयाहा सती
पक्षाच्छिदं गगनस्थामिमुरवी जगामे-
ति सम्बन्धः ॥

७६. अन्वयः- सपदि अद्रिहिमवान्
रुद्रक्रोधज्वालेन मुद्रितनेत्रां दयार्द्रां
सुतां अज्ञाभ्यामादाय दृक्तयोः सं-
सक्तां नलिनीं धारयन् देवहस्तीव
रयेणापतीकृतशरीरः सन् पन्था-
नमुद्दिश्य जगाम ॥ पन्थानं प्रतिगता
प्रतिपथा । प्रतिपथा प्रतिर्यस्य स
तथोक्तः ॥

सम्पूर्णा स्तुतीयस्तर्कतीर्थः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

अथ चतुर्थ सर्गाटिप्पणम्य: ।

१. अथ मोहपरायणा सती विवशा कामवधू: अतिशयवेदनं नववैधव्यं व्रतिपादयिष्यता विधिना विबोधिता ॥ मोहो मूर्च्छा परम् अयनम् आश्रयो यस्मा: मोहैकशरणा । परायणमभिप्रेते तत्परे परमाश्रये इति यादव: । व्रतिपादयिष्यता अनुभावयिष्यता, कठिनहृदयम् ॥ ३ ज्ञानयुक्ता अन्धीरे ॥

२. प्रियं कामं अतसयोरन्तर्हितगतयो: नित्यं दिहृक्षमाणयोरित्यर्थ: । तयो: लोचनयो: दर्शनक्रियापेक्षया सम्बन्धे बली ।

३. अन्वय:- आर्ये जीवितनाथ! जीव- -सि इत्युक्तिमात्रेण तथा अभिधाय पर: ॥ दीप्तौ प्रत्युक्तौ केवलं हरकोपानल मात्मा ददहो ॥ प्राणेश्वर!

४. वैक्लव्या- दीप्तिलुण्ठनेन । वैवस्विनेऽ- -हा, वारिदेवतावती ॥

CC-0. Prof. Satya Vrat Shastri Collection.

५. अन्वयः - तेन यत् करणं कानिमत्तया विलासिनामुपमानमभूत् । तादृदामित्योदि। करणं साधकतमे क्षेत्रगात्रेन्द्रियेष्वपीति अमरः। विदीर्घ्ये दिवादेराकृतिगणात्वात्। दिवादिस्तु श्यादिर्यदाकृतिगणः। तेन क्षीयते मृग्यतीत्यर्थेसाढ्रे रित्याहुरिते महोज्ञः। वस्तुतस्तु दद्यत दृणाते दीर्यते वेति भाष्यकारप्रयोगाद् दधातु दैवादिकोप्यस्तीति बोध्यम्॥

६. अन्वयः- कृतसेतुबन्धनो जलसंघातो नलिनीमिव त्वदधीनजीवितां मां क्व नु विनिन्दीर्घ्ये क्षणभिन्नसौहृदः (सन्) विद्युतोसि॥ त्वदायत्तप्राणाम् क्षणेन भिन्नं त्यक्तं सौहृदं सौहार्दं येन सः। सु शोभनं हृदयं यस्य स सुहृद्यः। ततः स्वादिषु पाठाद् हायनान्तयुवादिभ्योणीति अण्। नतु सुहृच्छब्दात्। तत्र हि सि हल्लोपगर्भे सिच्यन्तेपूर्वपदस्य चेति उभयपदवृद्धौ सौहार्दमितीत्स्यात्। अत्र नामनः - "सौहृदसौहृदश्रीकावाढ्यौ। हृद्भगसिन्धवन्ते॥"

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Satya Vrat Shastri Foundation and eGangotri

अन्ये तु [illegible] इत्यपपाठोऽनुत्तापकादैरूप्यम्।
अन्यथा एकतरस्य पाठवैयर्थ्यम्। बहुलग्रहणा
-द् सुहृदयशब्दे नोभयपदवाच्यरीतीरे॥

७. अन्वयः- त्वं मे विप्रियं कृतवान् नासि।
मया च ते घातिकूलं न कृतम्। अकारणमेव
विलपन्त्यै रत्नये किं यशो न दीयते॥

८. अन्वयः — हे स्मर! श्रोत्रस्खलीलतेषु
मेखलागुणौ बन्धनं स्मरसि उत। च्युत-
केशरदूर्वितेक्षणान्यवतंसोत्पलताडनानि वा
स्मरसि॥ नामजल्पितेषु, परनायिका-
नामग्रहणेषु इत्यर्थः। श्रोत्रं नाम्यचरो
कुले इति विश्वः। मेखलागुणैः रसना-
दामभिः। भयैः विकल्पैः कलुषिते नयने
येषु तानि।

९. हृदये वससीति स्मरवाक्यानुवादः।
परस्य रञ्जनार्थं यदसत्यभाषणं स उपचारः॥
उपचारपदम्- उपचारस्य प्रलादनस्य पदं नस्तु
इति- प्रलादनाराधनोपचाराश्चेति हलायुधः॥
इदमुपचारपदम्। न चेत् त्वमनङ्गः कथं
रतिरक्षता इति सम्बन्धः॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

१०. परलोकं यातं नवप्रवासिनः -
अचिरप्रोषितस्य। एष जनः, एष
लोको दैवेन प्रतारितः॥

११. हे प्रिय! घनशब्दविह्वलाः प्रियाः
कामिनां बलात्कारं प्रापयितुं क ईश्वरः।
घनगर्जितभीताः। राज्यन्धकाराकृते।

१२. अन्वयः- रक्तानि नेत्राणि चालयन्
प्रतिपदं व्याजहरान् विपर्यासयन्
प्रमदानां मोदमत्तताविकारः अधुना
त्वयि अस्ति अनुकृतिमात्रम्। स्त्रीणां
अधुना विडम्बना दारुणैव॥

१३. अन्वयः - (हे) अनङ्ग! प्रियसखस्य
ते शरीरं कृशावशेषां यातं ज्ञात्वा
सखेऽमः सुधाकरः कृष्णापक्षे गते पि
कार्श्यं दुःखं यका त्यक्तुं॥
बहुलं पूरयितुं न हि शक्तः पावके दीप्तो
कृष्णापक्षे इति हेमचन्द्रः॥

१४. अन्वयः - हरितताम्रचारुनखानः
कलपुंस्कोकिलशब्दसूचितो नवचूतप्रलवः
सम्प्रति [illegible] वसन्तं नामिव्याति वद॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

हरितन्त्रयतिलक्ष्य, मणौ मणौ नेति तत्पुरुषः।
न धरेत्ता विन्दुनादेनानुस्वारेण तः सन्।
बन्धनं वन्धम्॥

१५. अन्वयः- त्वया नेत्रश्रो धनुषो गुणाकृष्य
मे मोजितेयमालिवाङ्मेरित्यादि।
बहुशः। मोर्वाग्निर्यः। दुर्मदुःखानाम्।
"दुरस्तु गर्हितो श्रेष्ठे गुरौ पितरि दुर्धि"
इति शब्दार्णवः॥

१६. अन्वयः- तावत् पुनरपि सुन्दरं शरीरं
प्राप्य उक्तितः त्वन् स्त्रियोक्तिषु स्वभाव-
प्रगल्भां कोकिलां सुरतदूतीकलासेषु
आत्तादरम। ईवन्तस्यापि दूतीशब्दस्य ङ्यो
-रुक्प्रत्ययाद ह्रस्वः॥ तस्य ङ्याप्योः संज्ञाछन्दो
सो र्बहुलम् इति ह्रस्वः॥

१७. अन्वयः हे स्मर! शिरसा प्रणम्य -
रहः एकान्ते सुरतानि च लब्धुम्

१८. अन्वयः— (हे) रतिकुशल! त्वया मम
अङ्गेषु स्वयं रचितं मार्दवं कुसुमशलाघनं
इदमवतिष्ठते। तत् तत् सुन्दरं वपुर्न दृश्यते॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

१९. तामिमं रामं मे चरणाभिति सम्बन्धः।
'वीरकम्मे वसाधनम्'। रायेतलासारागम्।

२०. अहं शालभमार्गेणागत्य पुनस्ते उत्सङ्गावतिनी भवामि। हे प्रिय! स्वर्गे चतुरैरप्सरोगणैर्मावन्न विलोभ्यसे विलोभयिष्यसे। यावत्पुरा-निपातयो र्लट् इति लट्॥

२१. अन्वयः- हे रमण! त्वामनुयामि यद्यपयनुगोमव्यामेव (यद्यपीत्यवधारणे इति केशवः) किन्तु रतेः मदनेन विना-कृता .... इदं वचनीयं मे अवस्थितं सुस्थिरमभूत्। विनाकृतेत्यत्र सप्तम्यै ति समासः।

२२. परलोके अन्तरितस्य व्यवहितस्य-कौलीनं जनवादः स्यादिङ्गानं वचनीयता इति हलायुधः॥ पूर्वसम्भावितां दशां गतोसि। गति र्बहुत्वणे ज्ञाने यात्रोपाय-दशाध्वसु इति हेमचन्द्रः॥

२३. अन्वयः- हृदयकामः कुसुमायो-जितः कामी कस्ते सखा मधः कृतु।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

(अपवर्ग) [illegible] विलसनेन विनाकृता
---- गतिं न गमितः खलु (न प्रापितः किम्)॥
"जिज्ञालानुनये खलु"—

२५. घोरदेवताक्षरैः - विलापवचनैः।
आतुरामापन्नाम्। "अभ्युपपत्तिरनुग्रहः"
इत्यमरः। "विवाक्ते दिग्धोलिप्तौ"—

२६. स्तनसम्बाधं - कुचौ घोरीकृत्य,
उरो ऊधान वक्षश्च ताडितवती।

२७. अन्वयः- कुरबकता सा रतिः एतया
- च च। चकारः पूर्वोक्तसमुच्चयार्थकः। हे
वसन्त इत्यादि। कराग्रो नख्म चूर्णी-
कृतं नख्म। कपोतकर्बुरं पारावतशबलम्

२८. अन्वयः- नु सहचरेणानया वसन्तेन
सुरासुरसोहितं जगत् मृणाललूत्रमौर्वीकृ
त्य सुकुमारकुसुमबाणान्य ते धनुषः-

२९. निर्वर्तित इति भविष्यत्सामीप्ये
वर्तमानप्रत्ययः।

३१. अन्वयः— नु वसन्त! कामवधे
मां विमुञ्चता विधिना ---
अनङ्गदीपितेन [illegible] प्रजाग्नेः पतनाय
नगरी॥

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Sarayu Trust Foundation and eGangotri

३२. अन्वयः- तद् (तस्मात्कारणात्) अनन्तरं भवता इदं बन्धुजनप्रयोजनं क्रियताम्।

३३. विचेतनैरपि प्रतीयते हि। अलवणा अवाग्, अनुदरा कन्या- इति वदत्पत्नीमिप्रायेण। विचेतनैरपीति निर्देशः॥

३४. अन्वयः- अमुना प्रसीदतिना सुन्दरेण ---- नूतनपत्रतल्पे यथा तथा वहो शरीरं निधास्यामीति।

३५. हे साधो! --- काष्ठक्यं कुरु।

३६. दक्षिणवातवीजनैः- मलय-मारुतसच्चालनैः॥

३८. पाठानुवर्ती अन्वयः। शरीरस्य विसर्गाय।

४०. अन्वयः- हे कामप्रिये! तवत्तो चिरात् (चिरं चिराय) दुर्लभे न भविष्य-ति।

४२, ४३— धर्मेति। याचितः त तपला तत्प्रणीतेति हर —— सङ्गमयिष्यतीति

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

स्मरश्मशानस्थावलानदीयोनीं वाच्यव्याह ।
वशिनो जितेन्द्रियाः ॥

४४. अन्वयः- हे सुन्दरि! भावेष्यन् प्रियेण
सङ्गमो मत्स्य तदिदं वपुः परिरक्ष।
कृत्यलुटो बहुलमिति कर्तरि तक्तत् ॥
रविर्यातअला तपात्यये पुनरोघेन हि मुज्यते
नदी ॥ घ्रुवं तपात्यय इते हलायुधः ॥

४५ - किमपि भूतं कोऽपि त्वाणी।

४६. अन्वयः- अक्ष्व्यलनकुशा मदन-
वधूत्पलवानं किरणवीरक्षयधूलरा
दिवातनस्य शशिनो लेखा प्रदोषोमव
वीरपालमाम्यभूत इति ॥ उपलवानं
-पलवावलने विषदबोधम्- "प्रदोषो रजनीमुखम्-" ॥

सम्यूर्णश्चनुर्थसर्गटिप्पण्यः ॥

अथ पञ्चमसर्गटिप्पण्यः—

१. अन्वयः- पार्वती तथा समक्षं मनोभवं
दहता पिनाकिना [illegible] मनोरथा लती---

CC-0. Prof. Satya Vrat Shastri Collection.

"प्रियेव सौभाग्यफला हि चारुता" —

Digitized by Sarayu Trust Foundation and eGangotri

प्रियवल्लभ्यं फलं यस्याः सा

२. अन्वयः - सा एकाग्रतामवलम्ब्य त्वस्य सकलसौन्दर्यं कर्तुमियेष। तादृशः पतिः - मृत्युञ्जयस्त्र्यक्षः।

३. मेना हरासक्तचित्तां तपश्चरणाय कृतो-द्योगां सुतां श्रुत्वा, एनां पर्वतीमालिङ्ग्य (नद्याला पौरस्त्य) तपसो निवार-यन्ती उवाच।

४. अन्वयः - हे वत्से! मनीषिताः देवताः गेहेषु सन्ति। तपः कुतावत् वपुष्यं कुरु? मृदुलं शिरीषपुष्पं भ्रमरस्य पदाघातं सहते पतत्रिणः पुनः न सहेत॥

५. अन्वयः - इत्यनुशासती मेना... ध्रुवेच्छां स्थिरसंकल्पाम्-

कं ईप्सितार्थे स्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं पतोपमेत्॥

CC-0. Prof. Satya Vrat Shastri Collection.

निम्नप्रवणोपमदत्र द्रष्टव्यौ मीनावेवं मनो

दुर्वारमौन भाव: ॥

Digitized by Sarayu Trust Foundation and eGangotri

६. अन्वय:- कदाचित् मनोज्ञवनीलो मनोरथश्च पितरमालस्यसरवीमुखेन कलोदयाय तप:समाधये ---- आलस्य-सरवी आलसरवी तेन मुखेन मुख्याय: तेन मुखं वि:सरणं यत्र प्रारम्भोपायपोरपै- इति विग्रह: ॥

७. अन्वय:- अथ गौरी अनुरूपौमौन-वेशतोविणा --- पश्चात् घनात्तु तदा-रब्धया प्राप्तिं शिखरं जगाम ॥ योग्येन आग्रहेण युक्तीति। शिखरोण्डमत्, तनु हिंस्त्रप्राणेप्रचुरमिति भाव: ॥

८. अन्वय: सुस्पष्ट:। अहार्यनिश्चया मिलोलयष्टिप्रोल्लुप्तचन्दनम् - चलाभि: च यष्टिभि: प्रोतैसरै: प्रमृष्टं स्तनान्तर्गतं चन्दनं येन तत्तथोक्तम्। पयोधरो-त्सेध:- स्तनोच्छ्राय:।

९. अन्वय:- तदाननं प्रोतसैद्धै: शिरोरुहै: यथा [illegible] तथैवं मधुरमभूत्।

CC-0. Dr. K. Sarva Rao Shastri Collection

Digitized by Sarayu Trust Foundation and eGangotri

वक्त्रं वरचरद्रोणीभरेण न तथौवला-
संगमपि प्रकाशते ॥ सरोसिजमनुविद्धं
शैवलेनापि रम्यमित्येतदभिज्ञानशाकुन्तलोक्तं
स्मारयति कविसार्वभौमः ॥ प्रालेयैः
भूषितैः - "प्रसिद्धौ स्फातभूषितौ" —
रोरुहनीतिरुहाः - इगुपधेति कः ।
शिरसि रुहाः इति शिरोरुहाः ॥

१०. अन्वयः- सा प्रतीक्षणं कृतरोमवैक्लव्यां
यां मौञ्जीं व्रताय बभार तत्पूर्वानिबद्धया
तया अस्या रसनागुणास्पदं सरोजमकीर्॥
तेन पूर्वं बद्धं यस्य तत्पूर्वं यथा तथा
निबद्धया. कृतरोमकं (वाक्यशात्)
रसना शुद्धघण्टिकौ यस्याः ।

११. तयेति - कुशाङ्कुराणामादानेन
लवनेन परिक्षता व्रणिता अङ्गुलयो
यस्य. अक्षसूत्रप्रणयी कृतः = जपमाला
सहचरः कृतः, तद्युक्तः कृत इत्यर्थः ॥

१२. महामूल्ये शयने लुण्ठनेन - दूयते स्म
खिद्यते। निवेदुली(च) - उपाविश्य।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

बाहुलतोपधानीनी - बाहुलतामुपधत्ते उपधानी-
करोति। "उपधानन्तूपबर्हः"—

अन्वयः- नियमस्थया तया क्षये ये क्षमं
प्रत्यर्पितं निक्षेपः अर्पितमिव। इतरत्स्प
-ष्टम्। विलास एव चेष्टितम्। निक्षेपः
स्थास्य एव चेति कोषः।

१४. अन्वयः- ता अलिन्दिता तती त्वयेव
..... ग्रहीये यक्ष्मात्प्रजन्मनां मेवां
पुत्रवात्सल्यं नापाकरिष्यति॥ अग्र-
गातानाम्। घटावेव स्तनौ: तयो:
पत्त्रवणौ: पत्त्रलतयोर्मि:॥

१५. अन्वयः- अरण्यवीक्षाञ्जलिदान-
लालिलाः तथा विश्राश्वसुः मया
कुतूहलात् तदीये नेत्रे: लोचने
सरवी नां
स्वा पुरः उपमिमीत॥ हरिण
सम्बन्धिभि नेत्रैः करणैः स्व स्वकीये
लोचने - अमिमीत = अक्षीपीरमाण-
तारतम्यस्थानाम् मानं चकार। केचित्तु
ता पातीति तदीये नेत्रैः कुतूहलात् पुरो
अग्रे वर्तमानानां सरवीनां लोचनेऽमिमीत

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Sarayu Trust Foundation and eGangotri

वक्त्रं सरःपङ्कजैरिव न तथैवला-
संगमपि प्रकाशते ॥ सरोरुहमनोविद्धं
शैवलेनापि रम्यमित्येतदङ्गुलालोक्तं
स्मारयति कविसार्वभौमः ॥ प्रालेयैः
भूषितैः - "प्रसिद्धौ ख्यातभूषितौ" —
रोरुहन्तीति रुहाः - इगुपधेति कः)
शिरसि रुहाः इति शिरोरुहाः ॥

१०. अन्वयः- सा प्रतीक्षणं कृतरोमवैक्लव्यां
यां मौक्त्रीं व्रताय बभार तत्पूर्वानेवद्धया
तया अस्या रसनागुणास्पदं सरागमकीः ॥
तेन पूर्वं बद्धं यस्य तत्पूर्वं यथा तथा
नेवद्धया. कृतरोमाञ्चां (पक्षक्षात्)
रसना गुद्रघण्टिकौ इति क्वाडिः ।

११. तयेति - कुशाङ्कुराणामादानेन
लवनेन परिक्षता व्रणिता अङ्गुलयो
यस्य. अङ्गुलिव्रणयी कृतः = जपमाला
सहचरः कृतः, तद्युक्तः कृत इत्यर्थः ॥

१२. सहामलकं शयने लुण्ठनेन - दूयते स्म
विमर्दे । निवेदुली(च) - उपावेदच्च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

बाहुलतोपधानीती — बाहुलतामुपधत्ते उपधानी-
करोति। "उपधानन्तूपबर्हः"—

अन्वयः- नियमस्त्रिया तया क्षये ये क्षमं पुनर्ग्रहीतुं नेक्षेयः अर्पितामिव। इतरत्स्य-दृम्। विलास एव चेष्टितम्। नेक्षेयः स्काप्य एव चैति क्रोधः।

१४. अन्वयः- ता अलिन्दिता तती त्वयैव ..... ग्रहीत्वै एकमात्मजन्मनां मेवां पुत्रवात्सल्यं नापाकरिष्यति॥ अग्र-जातानाम्। घटावेव स्तनौ: तयो: पुत्रवणौ: पत्युतपयोमि:॥

१५. अन्वयः- अरण्यवीक्षाञ्जलिदान-लालिलाः तथा विश्राश्वसुः यथा कुतूहलात् तदीये नेत्रे: लोचने सरवी नां स्व पुरः अमिमीत॥ हरिण सम्बन्धिभि नेत्रैः करणैः स्व स्वकीये लोचने - अमिमीत = अक्षेपीत्माण-तारतम्यस्तानाम् मानं चक्रार। कैश्चित्तु ता वर्तिती तदीयै नेत्रैः कुतूहलात् पुरो अग्रे वर्तमानानां सरवीनां लोचनेऽमिमीत

CC-0. Prof. Satya Vrat Shastri Collection

व्रतस्नानानामस्मिन इत्याहुः ॥

Digitized by Sarayu Trust Foundation and eGangotri

१६. अन्वयः सुस्पष्टः। कृतामिमेकां कृतस्नानाम्। त्वगुत्तरालङ्कारवतीम् त्वचा वल्कलेन उत्तरीयवतीम्।

१७. अन्वयः- विरोधि---- तत् तपोवनं च पावनं नम्र। पावयतीति पावनम्। नवानभिज्ञानामभ्यन्तरेषु समृता: सिञ्चता। अनला। अग्नयो यस्मिन् ॥

१८. अन्वयः- सा देवी यदा पूर्वेणानुष्ठीयमानप्रकारेण। तपोनियमेन ----

१९. या कनुकुलीलयापि क्रमं ययौ धुनमल्या वपुः काञ्चनपद्मेन घटितम्, अत एव सुकुमारमपि सुसार च (कठिनञ्च) ॥

२०. अन्वयः- शुचौ शुचिस्मिता (विशदमन्दहासा) सुमध्यमा पार्वती दीप्तिमतां पुष्पवतीनां मध्यगता

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

सती नेत्रोपघातिनीं प्रभां (सावित्रं तेजः)

२१. अन्वयः - सवितृ र्गभीस्तीभिः साध्वी अतितप्तं तदीयं मुखं --- अस्य मुखस्य दीर्घीभवो रपाङ्गयोः केवलं (नेत्रान्तयोरेव) शनैः शनैः मन्द मन्दं श्यामिकया कालिम्ना पटं कृतम् ॥

२२. अन्वयः - अयाचितोपलब्धितं (अप्रार्थितोपनतं जलं, रसात्मकत्वेऽपि तोयस्य अमृतमयत्वं तीरेशस्य। वारणावधूर्भूत्वा पिबेत्। दक्षाणां दक्षे जीवनोपायः तद्भूमितिरिक्तं साधनं यस्य स तथोक्तः।

२३. अन्वयः - विविधेन नभश्चरेण (खेचरेण) आदित्यरूपेणेत्यर्थः। इन्धनसम्भृतेन (काष्ठसमिद्धेन) तेजसा तप्तायसे (पात्रविशेषे) खीः। "ग्रीष्मोष्मनाम्नी क्रमाणं" इति यादवः॥

२४. अन्वयः - पक्ष्मोदबिन्दवः पक्ष्मसु क्षणं स्थिता इत्यादि।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

लिप्यते। इति वक्षणां सान्द्रत्वं
क्षणमीति स्नैग्ध्यञ्च गम्यते।
ताड़िताधराः - अनेन अधरस्य
मार्दवं गम्यते। पयोधरयोः स्तनयो
रत्सेधे उपरिभागे निपातेन चूर्णिताः
जर्जरिताः कुचकाठिन्यादीत्यानः॥
नाभिरक्षीत्यय इति स्त्रीत्वम्। लिङ्गा-
दिष्वं लोकाश्रयत्वाल्लुक्स्येति भाष्या
-त् पुंस्त्वमपि साधु। अतः एव
नाभिर्मुरमन्थे चक्रमध्यक्षीत्रययोः
पुमान्। द्वयोः व्राणेप्रतीके स्यात्
स्त्रियां कस्तूरिकामद इति मेदिनी॥
२५. अन्वयः - निरन्तरासु अन्तर-
वातवीथिषु अनेकेतनालिनीं
शिलाशयां तां महतस्तपसः लोके
लिखिताः धृताः विद्युद्भिः खलोकनैः
कलोकयन्तिव। नीरन्ध्रासु।
अन्तरे मध्ये वातो यासां तादृश्यः।
२६. अत्यन्त हिमोत्किरा

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust. Foundation and eGangotri

नेला: महत्व सती ऽपलाततत्परा परस्परम्
आक्रीडिने (अन्योन्यमाक्रीडिशीने) प्रवो-
विक्षुब्धे चक्रवाकयो: मिथुने कृपावती
(सती) निनाय ॥ उदवाले तत्पर: ।
षेवंवासनाहनीधिषु योन्युदात्तेश: ॥
परस्परम्- कर्मधारयेतरे सर्वनाम्नो द्वे
वाच्ये इति द्वित्वम् । समासवच्च बहुलमे
दीति वक्तव्यम् । बहुलग्रहणादन्यपदयो र्न
समासवद्भाव: । असमासवद्भावे पूर्वपदस्य
सुप: पूर्वसवर्ण: । क्त्वाप्रत्ययेषु चेति सत्वम्
अन्योन्यसंश्रये तीदिति भाष्यकारप्रयोग-
प्रामाण्यात्पुन: समास: । परस्परा क्रीडिने ॥
२७. अन्वय:- सा निशि यद्यस्मिन्
-नो प्रवेपमानाधरयत्रशोभिना मुखेन
इत्यादि । प्रवेपमान: अधर: ओष्ठ
एव पत्रं दलं तेन शोभते -
२८. पुराविद: पुराणज्ञा: । तपस:
परा काष्ठा हि - परमुत्कर्षो हि - काष्ठो-
त्कर्षे दिशतौ दिशा - इत्यमर: ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

२९. अन्वयः- मृणालिकापेलवं स्वमङ्गमेवमादिभिः व्रतैरहर्निशं श्लपयन्ती सा ।

एवमुक्तप्रकारतोयाजिनमध्यवास-व्रतमादिर्येषां तैः व्रतैः । दूरमधश्चकार- अत्यन्तं तिरश्चकार ।

३०. अन्वयः- अथ अजिनावाक-धर .... कार्श्यकुटिलैः शरीर-बन्धैः प्रथमाश्रमो यथा तपोवनं विवेश ॥ यथाशब्दश्चार्थे ॥

अजिनावाढ्यो धरः । अजिनं चर्मणो चित्यात्कृष्णासारस्य चर्म्म । शरीर-बन्धैः गृहीतशरीरैः- वाहिताग्न्यादि-षु पाठात्साधुः ॥

तत्सादृश्यमभावश्च तदन्यत्वं तदल्प-ता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः । यथा-अब्राह्मणः अपापम् । अनश्वः । अनुदरा कन्या । अपचीलः । अधर्म्मः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust. Funding by MoE-IKS and eGangotri

अथ किरातार्जुनीये शब्दार्थविमर्शः ॥

प्रथमः सर्गः —

२. अन्वयः — कुरूणामीश्वरस्य त्रिदशपतेः पालनीं प्रजासु वृत्तिं वेदितुं समयुक्तौ वर्णिलिङ्गिनौ स वनेचरः द्वैतवने युधिष्ठिरं समाययौ ॥ पालनीं प्रतीक्षापीन्द्रामुप्रजारागमूलत्वात्सम्यक् । वर्णिः प्रशस्तिरस्यास्तीति वर्णी तस्य लिङ्गः सत्यास्तीति वर्णिलिङ्गी । ब्रह्मचारिवेषवान् । विदितः — (१) विदितं वेदनमस्यास्तीति विदितः परोक्षानुसन्धानवान् इत्यर्थः । अर्श आदिभ्योऽच् इत्यच्प्रत्ययः । पीता गावः, मुक्ता ब्राह्मणाः, विभक्ता भ्रातर इत्यादिवत्साधुत्वं तु कृतीदृक्तः, सन्निर्मङ्क्ष्यस्तस्य विधानाभावात् । (२) अथवा उत्तरपदलोपो द्रष्टव्यः । विभक्तधना विभक्ता इत्यादेः । अत्र लोपशब्दार्थविदिति [illegible] । ग्रन्थार्थस्याप्रयोग

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

एव लोपो ईष्यते: । विपन्ना आतर
इत्यत्र धनस्य पर, विपन्नत्वं तद्भात
-वूपचर्म्यते । (२) अथवा विदितो विदि
-तवान् सकर्मकादप्यविवक्षिते कर्म्मणि
कर्तरि क्त: । आशित: कर्ता इत्यत्र
यथाहु: । धातोरर्थान्तरे वृत्ते धात्वर्थे
-नोपसङ्ग्रहात् । प्रसिद्धेरविवक्षात:
कर्म्मणोऽकर्म्मिका क्रिया इति ।
क्रमश उदाहरणानि — (क) नदी प्रवहति-
(ख) प्राणिति, जीवति, शक्यते । (ग)
मेधो वर्षति (घ) सञ्जूते, हरि: पश्यति ॥
युधिष्ठिर :- वाक्येन सेतानवगमान्नित्य
समासोयम् ॥

इदमत्र कथावस्तु सम्यगवधेयम् —
अक्षक्रीडायां निर्जितो युधिष्ठिर :
यत्या प्रतिमिश्च सह द्वैतवनं समाक्रामत
दुर्योधने प्रजा अनुरक्ता नवेति वृत्तान्तस्य
परिज्ञानाय प्रच्छन्नवेशं कश्चित् निरातं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

हस्तिनापुरं वैरमत ॥

२. अन्वयः - कृतप्रणामस्य सयत्नेन जितं महीं महीभुजे निवेदयितुं व्यवस्तस्य मनः... मनसि न चचाल - यद्वा मनश्चलनयोः। अमौढ्यमप्रान्त्यमूढत्वाभावित्वमसम्मूढकत्वं चेति चतुर्गुणा इति नीतिवाक्यामृते। जितां स्वायत्तीकृतां अधिकृतां। चचाल = उद्विनिजे चकम्पे। कृतानतेः।

३ अन्वयः - स हसीति.... विधातुं आधारं कर्तुमिच्छतः। औदार्यमर्थ- deficiency of meaning सम्पत्तिः - सुष्ठु भावः सौष्ठवं शब्दसाम्य- elegance धर्म्यं - उक्षाव्यादित्यादन्प्रत्ययः। तयोर्द्वन्द्वः सौष्ठवौदार्ये - अत्र औदार्यशब्दस्य अन्यायदन्तत्वेपि लक्षणहेत्वोः क्रियायाः इति अल्पस्वरत्वादपि हेतुशब्दस्य पूर्व- निपातमनुचिता सूत्रकृतेन पूर्वनिपात- शास्त्रस्यानित्यत्वज्ञापनान्न पूर्वनिपातः सौष्ठवम् - प्रणश्यत्यनेनेति नयोक्तनोक्षाव्यादि- भ्योत्वन् भावकर्मणोः - निर्निश्चितार्थः well-defined in sense.

ज्ञापकस्य सामान्यापेक्षत्वात्

उदारो दारुमहतो:— Here उदार has been taken to mean weighty in sense, or meaning.

का नाम प्रबन्धाभिरामता इत्यत्र आशयिमतोपन्यास:—

स्तुवन्ति गुर्वीमभिधेयसम्पदं
विशुद्धिमुक्तेरपरे विपश्चित:।
इति स्थितायां व्रतिपूरुषं रुचौ
दुरुत्तरा: सर्वमनोहरा गिर:॥

माघोपि मतमेतदनुमोदते शब्दान्तरै:
'नालम्बते दैर्घ्यिकतां न निबीदति पौरुषे
शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते'॥

४. हे नृप! क्रियासु युक्तैरनुजीविभि:
चारचक्षुष: प्रभवो न वञ्च्यन्ते---
निग्रहानुग्रहसमर्था: स्वामिन:। चारा एव
चक्षूंषि चारचक्षूंषि तद्वद्भूतां पदे पदे वि-
निपात इति भाव:॥ क्षान्तं सोढुम्
चारचक्षुष:- प्रणिधिनेत्रा:। हितं पथ्यम्
श्रवणपरुषम्- कर्णकटोरम्॥

Digitized by Sarayu Trust Foundation and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Sarayu Trust Foundation and eGangotri

प्रायेण हितं तत्त्वं नौषधमिव कटु भवति
अतः अप्रियमपि मे वचनं भवतै स्वदता
नूः परिणामसुखावहत्वात् ॥ चराः -
चरन्तीति चराः - वचाधच् -

५. अन्वयः - योऽधिपतिं साधु न शास्ति
स किंसखा, यः हितात् न संशृणुते
स किंप्रभुः। साधु न शास्ति - हितं
नोपदिशति - does not give wholesome
advice. संशृणुते - सम्पूर्वाच्छृणोतेः
रुदन्मित्यादात्मनेपदमकर्मकत्वं वै-
नादिकम्। शेतेमासीत्तं धातिमितियावत्॥

६. मया निदिष्टं निगूढतत्त्वं नयनार्थं अवेदि
इति यत् अयं तवानुध्यानः॥ निगूढ-
तत्त्वं संवृतयाथार्थ्यम् - अबोधविप्लुता
अज्ञानोपहताः। अयमिति वेदनमित्यर्थः
विधेयप्राधान्यात्पुंल्लिङ्गनिर्देशः।
सन्ध्यादिमाङ्गल्यप्रयोगबन्धुरा दुःसञ्चारा
खलु अतिगहना नीतिमटवी। तत्र
प्रेक्षावतामपि पदे पदे स्खलनी गतिः
विभ्रमो भवति। किं पुनर्मोहान्धितदृशा

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

-द्र। सिद्धयन्ति कर्म्मसु महत्स्वपि यत्-
-निमोद्यमाः सम्भावनागुणमवेहि तमी-
-श्वराणाम् ॥ इदमेतदर्थः शब्दा यच्छब्द-
विशेषाकाङ्क्षत्वप्रतीयमाने तच्छब्देन समानार्थ
तया प्रयुज्यन्ते।

७. अन्वयः- सुयोधनो नयासनस्थोपि
वनाधिवासिनो भवतः पराभवं विशङ्क-
-मानः — इत्यादि — वितर्कयन्,
उत्प्रेक्षमाणः। जगतीं महीम् जगतो
विष्टपे महां वा तुच्छन्दोविशेषयोः —
इति वैजयन्ती। समीहते आप्रियते
अवस्यति चेष्टते नन्दादन्त इत्यर्थः।
बलवत्स्वामिकुपरिक्षुद्रागमं च धनं
अज्ञानत्य कुतो मनः समाधिरिति
भानः ॥

८. अन्वयः सुस्थः। उत्कर्षमापादयन्
विरोधो वैरम्। महात्मभिः उत्कृष्टस्वभा
-वैः महद्भिः। अवक्रिगोवया - गुणैः
अवन्तमात्मानमित्युमिच्छया। To excel you.
भूतिं समुन्नयन् - Confirming to one's improvement

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

गुणसम्पदा दयादाक्षिण्यादिगुणगरिमणा —
विशेषो वरम्— मनाक् प्रियः। "देवाद् वृते
वरः श्रेष्ठे त्रिषु क्लीवं मनाक् प्रिये"।
यद्यप्यासमानाधिकरणेऽपि क्त्वेतीति
लटः शतृशानचौ— इत्यत्र पुनर्ल्लिग्रहणात्
उपस्थितं भवतीति काशिकाकारः॥
साधुजनेन सङ्गवोऽपि अभ्युदयस्य मूलम्—
का कथा सङ्गतेरित्यर्थः॥
६. अन्वयः— अस्तन्द्रिणा तेन नयेन
वीतवं वितन्यते। पुरुषकारो विस्तार्यते। नयेन नीत्या— in accordance
with statesmanship. वीतवमुद्योगः—
energetic efforts. अस्ता तन्द्रालस्यं
येन सः— by him who has banished
all idleness. कृतारिषड्वर्गजयेन =
कृतः शौर्येण अरिषड्वर्गजयः शत्रुवर्गजयो येन।
केवलं दानादरचेष्टितं केवलाश्च नीतिः
कातर्यमिति अवधार्य उभाभ्यां सिद्धि-
मभिप्सति॥ कृतारि··· शिवभागवतवत्
समासः॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Sarayu Trust Foundation and eGangotri

-म् । सिद्धयन्ति कर्म्मसु महत्स्वपि य-
न्नियोज्या : सम्भावनागुणमवेहि तमी-
-श्वराणाम् ॥ इदमेतदः शब्दा यच्छब्द-
